# रघुवंशमहाकाव्यम्

**श्लोकः -** **वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ १ ॥**

दच्छेदः - वागर्थौ इव सम्पृक्तौ वागर्थ-प्रतिपत्तये जगतः पितरौ वन्दे पार्वती-परमेश्वरौ ।

न्वयः - अहं वागर्थौ इव सम्पृक्तौ जगतः पितरौ पार्वतीपरमेश्वरौ वागर्थप्रतिपत्तये वन्दे ।

ावार्थः - अहं शब्दार्थयोः सम्यग्ज्ञानार्थं नित्ययुक्तौ संसारस्य मातापितरौ शिवा-शिवौ प्रणमामि। तयोः प्रसादेन मयि काव्यरचनाशक्तिः भवतु ।

हन्दी अर्थ - शब्द और अर्थ के समान सदा सम्मिलित, संसार के माता-पिता भगवान् शिव और पार्वती को वाणी और अर्थ की सिद्धि के लिए नमस्कार करता हूं ।

कः -

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥ २ ॥

छेदः - क्व सूर्यप्रभवः वंशः क्व च अल्पविषया मतिः तितीर्षुः दुस्तरम् मोहात् उडुपेन अस्मि सागरम् ।

यः - सूर्यप्रभवो वंशः क्व ? अल्पविषया मतिः च क्व ? (अहं) दुस्तरं सागरं मोहात् उडुपेन तितीर्षुः अस्मि ।

र्थः - लघुना उडुपेन (प्लवेन, चर्मावनद्धेन यानपात्रेण) सागरे प्लवनं एव क्लेशकरं चेत् तस्य पारगमनं तु चिन्तयितु

अशक्यम् । तथैव सूर्यात् उत्पन्नस्य वंशस्य अद्भुतं वैभवं मदीया अल्पबुद्धिः आकलयितुम् अपि न शक्नोति, त

वंशस्य विषये काव्यलेखनं तु दुःसाध्यं कार्यम्। किन्तु सूर्यवंशकथा प्रतिपाद्या (अत्यन्तं प्रसिद्धा उत्कृष्टा च अत

कथयितुं योग्या) इत्यतः रघुवंशं काव्यमिदं लेखितुमिच्छुः अहम् इति कविवरः कथयति ।

ी अर्थ – कहां सूर्य से उत्पन्न वंश कहां अल्प विषय जानने वाली मेरी (कालिदास) बुद्धि (मैं कालिदास) दुस्तर समुद्र क
अज्ञानता के कारण छोटी नाव से पार करना चाहता हूं ।

श्लोकः - मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभाद् उद्बाहुरिव वामनः ॥ ३ ॥

पदच्छेदः - मन्दः कवियशःप्रार्थी गमिष्यामि उपहास्यताम् प्रांशुलभ्ये फले लोभात् उद्बाहुः इव वामनः ।

अन्वयः - प्रांशुलभ्ये फले लोभात् उद्बाहुः वामनः इव, मन्दः कावियशःप्रार्थी (अहम्) उपहास्यतां गमिष्यामि ।

भावार्थः - मदीयं काव्यरचनकौशलं तु अल्पम् । किन्तु महाकवेः यद् यशः भवति तत् प्राप्तुम् इच्छुकः अहं परिहासपात्रतां न प्राप्नुयाम् इति कवेः चिन्ता । यथा उन्नते वृक्षे लम्बमानं फलं प्राप्तुं वामनः (खर्वः) जनः भुजम् उत्तोलयति चेत् तस्य उपहासः भवति ।

हिन्दी अर्थः कवियों की कीर्ति का अभिलाषी (मैं) लम्बे मनुष्यों के द्वारा पाने योग्य फल की ओर लोभ से ऊपर हांथ उठाये हुए बौने पुरुष के समान उपहासास्पद होउंगा ।

श्लोकः - अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥ ४ ॥

च्छेदः - अथवा कृत-वाक्-द्वारे वंशे अस्मिन् पूर्वसूरिभिः मणौ वज्रसमुत्कीर्णे सूत्रस्य इव अस्ति मे गतिः ।

वयः – अथवा पूर्वसूरिभिः कृत-वाक् द्वारे अस्मिन् वंशे मे गतिः, वज्रसमुत्कीर्णे मणौ सूत्रस्य (गतिः) इव अस्ति ।

ार्थः - कठोररत्नेषु प्रथमवारं रन्ध्रकरणं दुष्करम् । बहुमूल्य-कठोर-रत्नेषु रत्नविदा वज्रसूच्या रन्ध्रे कृते सति तत्र सूत्रस्य प्रवेशः सुगमः ।

आदिकविः वाल्मीकिः, व्यासमुनिः अन्ये च श्रेष्ठकवयः पूर्वमेव रामायणे पुराणेषु च सूर्यवंशकथाः अरचयन् । तै निर्मितायां वाङ्-मालायाम् अल्पशक्तियुक्तस्य सूत्रस्य इव मम प्रवेशः सरलः इत्यतः अहं रघुवंशप्रबन्धलेखनं कर्तुम् उद्युक्तः अस्मि इति भावः ।

दी अर्थः – पूर्व में वर्तमान विद्वानों द्वारा वर्णन किये गये इस रघुवंश में सुई से छेदे हुये मणि में सूत्र के समान मेरी (कालिदास की) गति है ।

ः -

सोऽहमाजन्मशुद्धानाम् आफलोदयकर्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥ ५ ॥
यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।
यथाऽपराधदण्डानां यथाकालप्रबोधिनाम् ॥ ६ ॥
त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषेणां प्रजायै गृहमेधिनाम् ॥ ७ ॥
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥ ८ ॥
रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥ ९ ॥

च्छेदः - सः अहम् आजन्मशुद्धानाम् आफल-उदय-कर्मणाम् आसमुद्राक्षितीशानाम् आनाक-रथ-वर्त्मनाम् ।।5।। यथा-विधि-हु
ीनाम् यथा-कामार्चित-अर्थिनाम् यथा-अपराध-दण्डानाम् यथा-काल-प्रबोधिनाम् ।।6।। त्यागाय सम्भृत-अर्थानाम् सत्याय मि
षेणाम् यशसे विजिगीषूणाम् प्रजायै गृहमेधिनाम् ।।7।। शैशवे अभ्यस्त-विद्यानाम् यौवने विषयैषिणाम् वार्धके मुनि-वृत्तीनाम् यो
ते तनु-त्यजाम् ।।8।। रघूणाम् अन्वयम् वक्ष्ये तनु-वाक्-विभवः अपि सन् तद्गुणैः कर्णम् आगत्य चापलाय प्रचोदितः ।।9।।

वयः - सः अहम्, आजन्मशुद्धानाम्, आफलोदयकर्मणाम्, आसमुद्रक्षितीशानाम्, आनाकरथवर्त्
विधिहुताग्नीनां, यथाकामार्चितार्थिनां, यथाऽपराधदण्डानां, यथाकालप्रबोधिनां, त्यागाय सम्भृतार्थानां, सत्याय मितभाषिणां, यश
जिगीषूणां, प्रजायै गृहमेधिनां, शैशवेऽभ्यस्तविद्यानां, यौवने विषयैषिणां, वार्धके मुनिवृत्तीनां, योगेनान्ते तनुत्यजां रघूण
वयं कर्णम् आगत्य, तनुवाग्विभवः अपि, तद्गुणैः चापलाय प्रचोदितः सन् अहं वक्ष्ये ।

## वार्थः -

अहं (कविः) जन्मनः आरभ्य शुद्धचरित्राणां, फलप्राप्ति-पर्यन्तं स्वीकृतात् कार्यात् ये न विरताः अभवन् तादृशानां, ये समुद्रपर्य समग्रां भूमिं शासितवन्तः तादृशानां, ये देवासुरयुद्धेषु इन्द्रस्य साहाय्यार्थं देवलोकं प्रति स्वरथेन एव अगच्छन् ततः आगच्छन् तादृशानां (रघूणाम् अन्वयं वक्ष्ये)

ये वेदानुसारेण नित्यम् अग्निषु होमम् अकुर्वन्, ये इष्टवस्तुदानेन याचकान् सत्कृतवन्तः, ये दुष्टानाम् अपराधानुसारेण द विहितवन्तः, ये उत्थानादेः आरभ्य सर्वकार्ये सर्वदा च जागरूकाः आसन्, तादृशानां (रघूणाम् अन्वयं वक्ष्ये)

ये सत्पात्रेभ्यः दातुम् अर्थसञ्चयम् अकुर्वन् न तु दुर्व्यापाराय, ये सत्यस्य रक्षणाय मितभाषणशीलाः आसन् न तु अन्येषाम् उपेक्ष (यथा गर्वितः जनः अन्यं उपेक्षते disregards), ये कीर्त्यै विजेतुम् इच्छुकाः आसन् न तु अर्थसङ्ग्रहाय, ये सन्तानाय गृहस्था प्राविशन् न तु कामोपभोगाय, तादृशानां (रघूणाम् अन्वयं वक्ष्ये)

ये ब्रह्मचर्ये विद्यायाः उपार्जनम् अकुर्वन्, ये गृहस्थाः सन्तः विषयोपभोगम् अकुर्वन्, ये वानप्रस्थे मुनिव्रतम् अनुष्ठितवन्तः प्रयाणकाले च परमात्मानं ध्यायन्तः देहम् अत्यज्यन्, तादृशानां (रघूणाम् अन्वयं वक्ष्ये)

(अहं कालिदासः) अल्पवाक्पटुः अपि इक्ष्वाकूणां कथां रचयिष्यामि यतः शीलवतां तेषां गुणाः मां प्रबन्धरचनाय अनुरुन्धन्ति (अनुरुन्धन्ति – अनुरोधं कुर्वन्ति) ।

## न्दी अर्थः –

जन्म से ही शुद्ध, फल की प्राप्ति तक कर्म करने वाले, समुद्र पर्यन्त पृथ्वी के स्वामी, स्वर्ग तक ले जाने वाले, विधि पूर्वक यज्ञों से अग्नि को तृप्त करने वाले, याचकों को मनोनुकूल दान देने वा... पराध के अनुसार दण्ड देने वाले, उचित समय पर जागरूक, दान के लिए धन का संग्रह करने वाले, सत्य... ए कम बोलने वाले, यश की इच्छा से विजय चाहने वाले, सन्तान के लिए विवाह करने वाले, बाल्यावस... विद्या का अध्ययन करने वाले, युवावस्था में भोग की इच्छा रखने वाले, वृद्धावस्था में मुनियों की तरह वन... कर तपस्या करने वाले और अन्त में योगाभ्यास के द्वारा शरीर त्यागने वाले, रघुवंशियों के गुणों से आकृ... कर मैं (कालिदास, अल्पमति होकर भी) उनके वंश का वर्णन करूंगा ।

ोकः - तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा ॥ १० ॥

च्छेदः - तम् सन्तः श्रोतुम् अर्हन्ति सत्-असत्-व्यक्तिहेतवः हेम्नः संलक्ष्यते हि अग्नौ विशुद्धिः श्यामिका अपि वा

वयः - सत्-असत्-व्यक्तिहेतवः सन्तः तं श्रोतुम् अर्हन्ति । हेम्नः विशुद्धिः श्यामिका अपि वा अग्नौ संलक्ष्यते हि ।

ार्थः - गुणदोषभेदज्ञातारः सहृदयाः एव एतं प्रबन्धं श्रोतुम् अर्हन्ति । यथा अग्निः स्वर्णस्य शुद्धताशुद्धतायाः प्रम
तथैव सहृदयाः (सन्तः) उत्तम-मध्यम-अवरकाव्यानां विवेचने अधिकारिणः भवन्ति ।

न्दी अर्थः – सत्य असत्य का विवेचन करने वाले सज्जन लोग उसके सुनने के योग्य हैं। क्योंकि स्व
की अच्छाई और बुराई की परीक्षा आग में ही होती है ।।

प्राध्यापकः - डॉ. जितेन्द्र तिवारी, साहित्यविभागः, एकलव्यपरिसरः, अगरतला, त्रिपुरा